॥ श्री गंगायै नमः ॥

शैलेंद्रादवतारिणी निजजलेमज्जज्जनोत्तारिणी ।
पारावारविहारिणी भवभयश्रेणीसमुत्सारिणी ॥
शेषाहेरनुकारिणी हरशिरोवल्लीदलाकारिणी ।
काशीप्रांतविहारिणी विजयते गंगा मनोहारिणी ॥१॥

# श्री गङ्गा—यमुना—सरस्वती—स्तोत्रम्

तथा

# श्रीमज्जयेन्द्र स्तुतिः

योगीन्द्रयतिवर्याय ब्रह्मतत्त्व प्रकाशिने ।
स्वामीजयेन्द्रसिद्धाय सन्त्वस्मन्नतयोऽनिशम् ॥

प्रकाशक :

ब्रह्मचारी चैतन्यानन्द (पं. धर्मदत्त शर्मा)

मेनेजर:—ॐ नमः शिवाय बैंक काशी.

सन् १९३५ प्रत २००० सन् १९९२

[... नमः शिवाय का १००० जप ]

# भूमिका ।

प्रियवर ! सज्जन पाठकवृन्द !

आप लोगों की सेवा में सादर निवेदन है कि यह गङ्गा यमुना–सरस्वती–स्तोत्र तथा श्री मज्जयेन्द्र–स्तुति नामक पुस्तक ॐ नमः शिवाय बैंक काशी, मैनेजर श्री ब्रह्मचारी चैतन्यानन्दजी (भूतपूर्व पं. धर्मदत्तजी) महाराजने बड़े परिश्रम से संगृहीत कर प्रकाशित किया है अतः आप लोग इन के परिश्रम को सफल करने के लिये इस पुस्तक को अवश्य ही उपयोग में लावें; क्यों कि ऐसी पुस्तक आजतक कभी नहीं छपी । इस में बड़े बड़े स्तोत्र और आरती तथा पूज्यपाद श्री १०८ महामण्डलेश्वर श्रीस्वामी जयेन्द्र-पुरिजी महाराजजी की स्तुति, अष्टक, यशवर्णन, प्रशंसादिकों का विशेष रूप से वर्णन किया गया हैं जो कि ऐसी पुस्तक अन्यत्र मिलनी बड़ी दुर्लभ है । और मैंने इसका आदि से लेकर अन्ततक संशोधन किया है सो सब ठीक है, लेकिन यदि कम्पोजकर्ता की असावधानी से अथवा मेरी ही असावधानी से कहीं कोई त्रुटि रह गयी हो तो उस को क्षमा करते हुए ठीक करने की कृपा करेंगे । और श्री ब्रह्मचारीजी महाराजने "परोपकारार्थ मिद शरीरम्" "परोपकाराय सतां विभूतयः" इत्यादि विश्वसनीय शास्त्र वाक्यों को चरितार्थ करते हुए भारत के कोने २ में ॐ नमः शिवाय इस महा-मंत्र का जो प्रचार किया है और लिखवा कर ॐ नमः शिवाय बैंक काशी में खोला है सो आप को विदित ही है अतः आप इस महा-मंत्र को यथा शक्ति शिवार्पण बुद्धि से लि[illegible]कर अथवा लिखवा कर ॐ नमः शिवाय बैंक काशी में जमा क[illegible] ।

निवेदक[illegible]र

पण्डित माम[illegible]शर्मा शास्त्री ।

दे पदेऽश्वमेधस्य फलदं यत्स्मृतं बुधैः॥
तस्माद् गच्छ महाराज प्रयागं प्रति भारत ॥१॥



॥ पूज्यपाद श्री १०८ स्वामी जयेन्द्रपुरीजी महाराज मण्डलेश्वर ॥
ठि. टेढीनीम गोविंद मठ काशी.

दर्शनात्स्पर्शनात्स्नानाद् गंगा यमुन संगमे ॥
निष्पापो जायते मर्त्यः सेवनात्स्मरणादपि ॥ २ ॥

# (१) गंगास्तुतिः ।

श्रीगणेशाय नमः ॥ ब्रह्मोवाच ॥ नमः शिवायै गंगायै शिवदायै नमो नमः । नमस्ते रुद्ररूपिण्यै शांकर्यै ते नमो नमः ॥ १ ॥ नमस्ते विश्वरूपिण्यै ब्रह्ममूर्त्यै नमो नमः । सर्वदेवस्वरूपिण्यै नमो भेषजमूर्तये ॥ २ ॥ सर्वस्य सर्वव्याधीनां भिषक्श्रेष्ठ्यै नमोस्तु ते । स्थाणुजंगमसंभूतविषहंत्र्यै नमो नमः ॥ ३ ॥ भोगोपभोगदायिन्यै भोगवत्यै नमो नमः । मंदाकिन्यै नमस्तेऽस्तु स्वर्गदायै नमो नमः ॥ ४ ॥ नमस्त्रैलोक्यभूषायै जगद्धात्र्यै नमो नमः । नमस्त्रिशुक्लसंस्थायै तेजोवत्यै नमो नमः ॥ ५ ॥ नंदायै लिंगधारिण्यै नारायण्यै नमो नमः । नमस्ते विश्वमुख्यायै रेवत्यै ते नमो नमः ॥ ६ ॥ बृहत्यै ते नमस्तेऽस्तु लोकधात्र्यै नमो नमः । नमस्ते विश्वमित्रायै नंदिन्यै ते नमो नमः ॥ ७ ॥ पृथ्व्यै शिवामृतायै च सुवृषायै नमो नमः । शांतायै च वरिष्ठाय वरदायै नमो नमः ॥ ८ ॥ उस्रायै सुखदोग्ध्र्यै च संजीविन्यै नमो नमः । ब्रह्मिष्ठायै ब्रह्मदायै दुरितघ्न्यै नमो नमः ॥ ९ ॥ प्रणतार्तिप्रभंजिन्यै जगन्मात्रे नमोस्तु ते । सर्वापत्प्रतिपक्षायै मंगलायै नमो नमः ॥ १० ॥ शरणागतदीनार्तपरित्राणपरायणे । सर्वस्यार्तिहरे देवि नारायणि नमोस्तु ते ॥ ११ ॥ निर्लेपायै दुर्गहंत्र्यै दक्षायै ते नमो नमः । परात्परतरे तुभ्यं नमस्ते मोक्षदे सदा ॥ १२ ॥ गंगे ममाग्रतो भूया गंगे मे देवि पृष्ठतः । गंगे मे पार्श्वयोरेहि त्वयि गंगेस्तु मे स्थितिः ॥ १३ ॥ आदौ त्वमन्ते मध्ये च सर्वं त्वं गां गते शिवे । त्वमेव मूलप्रकृतिस्त्वं हि नारायणः परः ॥ १४ ॥ गंगे त्वं परमात्मा च

शिवस्तुभ्यं नमः शिवे । य इदं पठति स्तोत्रं भक्त्या नित्यं नरोपि यः ॥ १५ ॥ शृणुयात् श्रद्धया युक्तः कायवाक्चित्तसंभवैः । दशधा संस्थितैर्दोषैः सर्वैरेव प्रमुच्यते ॥ १६ ॥ सर्वान्कामानवाप्नोति प्रेत्य ब्रह्मणि लीयते । ज्येष्ठे मासि सिते पक्षे दशमी हस्तसंयुता ॥ १७ ॥ तस्यां दशम्यामेतच्च स्तोत्रं गंगाजले स्थितः । यः पठेद्दशकृत्वस्तु दरिद्रो वापि चाक्षमः ॥ १८ ॥ सोऽपि तत्फलमाप्नोति गंगां संपूज्य यत्नतः । अदत्तानामुपादानं हिंसा चैवाविधानतः ॥ १९ ॥ परदारोपसेवा च कायिकं त्रिविधं स्मृतम् । पारुष्यमनृतं चैव पैशून्यं चापि सर्वशः ॥ २० ॥ असंबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् । परद्रव्येष्वभिध्यानं मनसानिष्टचिंतनम् ॥ २१ ॥ वितथाभिनिवशेश्च मानसं त्रिविधं स्मृतम् । एतानि दश पापानि हर त्वं मम जाह्नवि ॥ २२ ॥ दशपापहरा यस्मात्तस्माद्दशहरा स्मृता । त्रयस्त्रिंशच्छतं पूर्वान् पितॄनथ पितामहान् ॥ २३ ॥ उद्धरत्येव संसारान्मंत्रेणानेन पूजिता ॥ २४ ॥ नमो भगवत्यै दशपापहरायै गंगायै नारायण्यै रेवत्यै शिवायै दक्षायै अमृतायै विश्वरूपिण्यै नंदिन्यै ते नमो नमः ॥ २५ ॥ सितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्रां करधृतकलशोद्यत्सोत्पलामत्यभीष्टाम् । विधिहरिहररूपां सेन्दुकोटीरजुष्टां कलितसितदुकूलां जाह्नवीं तां नमामि ॥ २६ ॥ आदावादिपितामहस्य निगमव्यापारपात्रे जलं पश्चात्पन्नगशायिनो भगवतः पादोदकं पावनम् । भूयः शंभुजटाविभूषणमणिर्जह्नोर्महर्षेरियं देवी कल्मषनाशिनी भगवती भागीरथी दृश्यते ॥ २७ ॥ गंगा गंगेति यो ब्रूयाद्योजनानां शतैरपि । मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ २८ ॥ इति धर्माब्धिस्था गंगास्तुतिः संपूर्णा ॥

# (२) यमुनाष्टकम् ।

श्रीगणेशाय नमः ॥ कृपापारावारां तपनतनयां तापशमनीं मुरारिप्रेयस्यां भवभयदवां भक्तिवरदाम् । वियज्ज्वालान्मुक्तां श्रियमपि सुखाप्तेः प्रतिदिनं सदा धीरो नूनं भजति यमुनां नित्यफलदाम् ॥ १ ॥ मधुवनचारिणि भास्करवाहिनि जाह्नविसंगिनि सिंधुसुते मधुरिपुभूषिणि माधवतोषिणि गोकुलभीतिविनाशकृते । जगदघमोचनि मानसदायिनि केशवकेलिनिदानगते जय यमुने जय भीतिनिवारिणि संकटनाशिनि पावय माम् ॥ २ ॥ अयि मधुरे मधुमोदविलासिनि शैलविदारिणि वेगभरे परिजनपालिनि दुष्टनिषूदिनि वांछितकामविलासधरे । व्रजपुरवासिजनार्जितपातकहारिणि विश्वजनोद्धरिके जय यमुने जय भीति० ॥ ३ ॥ अतिविपदांबुधिमग्नजनं भवतापशताकुलमानसकं गतिमतिहीनमशेषभयाकुलमागतपादसरोजयुगम् । ऋणभयभीतिमनिष्कृतिपातककोटिशतायुतपुंजतरं जय यमुने० ॥ ४ ॥ नवजलदद्युतिकोटिलसत्तनुहेममयाभररंजितके तडिदवहेलिपदांचलचञ्चलशोभितपीतसुचैलधरे । मणि मयभूषणचित्रपटासनरंजितगंजितभानुकरे जय यमुने० ॥ ५ ॥ शुभपुलिने मधुमत्तयदूद्भवरासमहोत्सवकेलिभरे उच्चकुलाचलराजितमौक्तिकहारमयाभररोदसिके । नवमणिकोटिकभास्करकंचुकिशोभिततारकहारयुते जय यमुने० ॥ ६ ॥ करिवरमौक्तिकनासिकभूषणवातचमत्कृतचञ्चलके मुखकमलासौरभचञ्चलमत्तमधुव्रतलोचनिके। मणिगणकुंडललोलपरिस्फुरदाकुलगण्डयुगामलके जय यमुने० ॥ ७ ॥ कलरवनूपुरहेममयाचितपादसरोरुहसारुणिके धिमिधिमिधिमिधिमितालविनोदितमानसमंजुलपादगते । तव

पदपंकजमाश्रितमानवचित्त सदाखिलतापहरे जय यमुने० ॥ ८ ॥
भवोत्तापांभोधौ निपतितजनो दुर्गतियुतो यदि स्तौति प्रातः प्रतिदिनमन्याश्रयतया । हयाहेषैः कामं करकुसुभपुञ्जैरविरतां सदा भोक्ता भोगान्मरणसमये याति हरिताम् ॥ ९ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छङ्कराचार्यविरचितं
यमुनाष्टकं संपूर्णम् ॥

## (३) श्री सरस्वती स्तोत्रम्

रविरुद्रपितामहविष्णुनुतं, हरिचन्दनकुंकुमपंकयुतम् ।
मुनिवृन्दगणेंद्रसमानयुतं, तव नौमि सरस्वतिपादयुगम् ॥१॥

शशिशुद्धसुधाहिमधामयुतं, शरदंबरबिंबसमान करम् ।
बहुरत्नमनोहरकान्तियुतं, तव नौमि सरस्वतिपादयुगम् ॥२॥

कनकाब्जविभूषितभूतिभवं, भवभावविभाषितभिन्नपदम् ।
प्रभुचित्तसमाहितसाधुपदं, तव नौमि सरस्वतिपादयुगम् ॥३॥

भवसागरभज्जनभीतिनुतं, प्रतिपादितसंततिकारमिदम् ।
विमलादिकशुद्धविशुद्धपदं, तव नौमि सरस्वतिपादयुगम् ॥४॥

मतिहीनजनाश्रयपादमिदं, सकलागमभाषितभिन्नपदम् ।
परिपूरितविश्वमनेकभवं, तव नौमि सरस्वतिपादयुगम् ॥५॥

परिपूर्णमनोरथधामनिधिं, परमार्थविचारविवेकविधिम ।
सुरयोषित सेवित पाद तलं, तव नौमि सरस्वतिपादयुगम ॥६॥

सुरमौलिमणिद्युतिशुभ्र करं, विषयादिमहाभयवर्ण हरम ।
निजकान्तिविलेपितचन्द्रशिवं, तव नौमि सरस्वतिपादयुगम ॥७॥

गुणनैककुलस्थितिभीतिपदं, गुणगौरवगर्वितसत्यपदम ।
कमलोदरकोमलपादतलं, तव नौमि सरस्वतिपादयुगम ॥८॥

त्रिसंध्यंयो जपेन्नित्यं जले वापि स्थले स्थितः ।
पाठमात्राद्भवेत्प्राज्ञो ब्रह्मनिष्ठः पुनः पुनः ॥९॥

श्रीसरस्वतीदेवीप्रसन्नार्थम्समाप्तम ।

———:०:———

## (४) त्रिवेणीस्तोत्रम् ।

श्रीगणेशाय नमः ॥

मुक्तामयालंकृतमुद्रवेणी भक्ताभयत्राणसुबद्धवेणी ।
मत्तालिगुञ्जन्मकरन्दवेणी श्रीमत्प्रयागे जयति त्रिवेणी ॥ १ ॥

लोकत्रयैश्वर्यनिदानवेणी तापत्रयोच्चाटनबद्धवेणी ।
धर्मार्थकामाकलनैकवेणी श्रीमत्प्रयागे जयति त्रिवेणी ॥ २ ॥

मुक्ताङ्गनामोहनसिद्धवेणी भक्तान्तरानंदसुबोधवेणी ।
वृत्त्यन्तरोद्वेगविवेकवेणी श्रीमत्प्रयागे जयति त्रिवेणी ॥ ३ ॥

दुग्धोदधिस्फूर्जसुभद्रवेणी नीलाभ्रशोभाललिता च वेणी ।
स्वर्णप्रभाभासुरमध्यवेणी श्रीमत्प्रयागे जयति त्रिवेणी ॥ ४ ॥

विश्वेश्वरोत्तुङ्गकपर्दिवेणी विरिञ्चिविष्णुप्रणतैकवेणी ।
त्रयीपुराणा सुरसार्धवेणी श्रीमत्प्रयागे जयति त्रिवेणी ॥ ५ ॥

माङ्गल्यसंपत्तिसमृद्धवेणी मात्रान्तरन्यस्तनिदानवेणी ।
परंपरापातकहारिवेणी श्रीमत्प्रयागे जयति त्रिवेणी ॥ ६ ॥

निमज्जदुन्मज्जमनुष्यवेणी त्रयोदयोभाग्यविवेकवेणी ।
विमुक्तजन्माविभवैकवेणी श्रीमत्प्रयागे जयति त्रिवेणी ॥ ७ ॥

सौन्दर्यवेणी सुरसार्धवेणी माधुर्यवेणी महनीयवेणी ।
रत्नैकवेणी रमणीयवेणी श्रीमत्प्रयागे जयति त्रिवेणी ॥ ८ ॥

सारस्वताकारविघातवेणी कालिन्दकन्यामयलक्ष्यवेणी ।
भागीरथीरूपमहेशवेणी श्रीमत्प्रयागे जयति त्रिवेणी ॥ ९ ॥

श्रीमद्भवानीभवनैकवेणी लक्ष्मीसरस्वत्यभिमानवेणी ।
माता त्रिवेणीत्रयीरत्नवेणी श्रीमत्प्रयागे जयति त्रिवेणी ॥ १० ॥

त्रिवेणीदशकं स्तोत्रं प्रातर्नित्यं पठेन्नरः ।
तस्य वेणी प्रसन्ना स्याद्विष्णुलोकं स गच्छति ॥ ११ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्य विरचितं
त्रिवेणीस्तोत्रं संपूर्णम् ।

———:०:———

# (५) प्रयागाष्टकम् ।

श्रीगणेशाय नमः ॥

सुरमुनिदितिजेन्द्रैः सेव्यते योऽस्ततन्द्रै
गुरुतरदुरितानां का कथा मानवानाम् ॥
स भुवि सुकृतकर्तुर्वाञ्छितावाप्तिहेतु ।
र्जयति विजितयागस्तीर्थराजः प्रयागः ॥ १ ॥

श्रुतिः प्रमाणं स्मृतयः प्रमाणं पुराणमप्यत्र परं प्रमाणम् ।
यत्रास्ति गङ्गायमुना प्रमाणं स तीर्थराजो जयति प्रयागः ॥ २ ॥

न यत्र योगाचरणप्रतीक्षा न यत्र यज्ञेष्टिविशिष्टदीक्षा ।
न तारकज्ञानगुरोरपेक्षा स तीर्थराजो जयति प्रयागः ॥ ३ ॥

चिरं निवासं न समीक्षते यो ह्युदारचित्तः प्रददाति च क्रमात् ।
यः कल्पितार्थांश्च ददाति पुंसः स तीर्थराजो जयति प्रयागः ॥ ४ ॥

यत्राप्लुतानां न यमो नियन्ता यत्रास्थितानां सुगतिप्रदाता ।
यत्राश्रितानाममृतप्रदाता स तीर्थराजो जयति प्रयागः ॥ ५ ॥

पुर्यः सप्त प्रसिद्धाः प्रतिवचनकरीस्तीर्थराजस्य नार्यो ।
नैकट्यान्मुक्तिदाने प्रभवति सुगुणा काश्यते ब्रह्म यस्याम् ॥
सेयं राज्ञी प्रधाना प्रियवचनकरी मुक्तिदानेन युक्ता ।
येन ब्रह्माण्डमध्ये स जयति सुतरां तीर्थराजो प्रयागः ॥ ६ ॥

तीर्थावली यस्य तु कण्ठभागे दानावली वल्गति पादमूले ।
व्रतावली दक्षिणपादमूले स तीर्थराजो जयति प्रयागः ॥ ७ ॥

आज्ञापि यज्ञाः प्रभवोऽपि यज्ञाः सप्तर्षिसिद्धाः सुकृतानभिज्ञाः ।
विज्ञापयन्तः सततं हि काले स तीर्थराजो जयति प्रयागः ॥ ८ ॥

सितासिते यत्र तरङ्गचामरे नद्यौ विभाते मुनिभानुकन्यके ।
लीलातपत्रं वट एक साक्षात्स तीर्थराजो जयति प्रयागः ॥ ९ ॥

तीर्थराजप्रयागस्य माहात्म्यं कथयिष्यति ।
शृणुयात्सततं भक्त्या वाञ्छितं फलमाप्नुयात् ॥ १० ॥

इति श्रीमत्स्यपुराणे प्रयागराजमाहात्म्याष्टकं समाप्तम् ।

## ॥ श्रीमज्जयेन्द्रस्तुतिः ॥

### अथ मंगलप्रदप्रातःस्मरणम्

प्रातः स्मरामि विदितात्मयथार्थतत्त्वम् ।
सच्चित्स्वरूपनिलयं कृतकृत्यशेषम् ॥

शिष्यालिवृन्दमदमोहविनाशदक्षम् ।
श्रीमज्जयेन्द्रयतिवर्यमहानुभावम् ॥१॥

प्रातर्भजामि निगमार्थविदग्रगण्यम् ।
निर्वाणपीठवरभूषणमण्डलेशम् ॥

अष्टाङ्गयोगपरिनिष्ठमुरुप्रभावम् ।
आनन्दमूर्तिमनघं जितसर्व लोकम् ॥२॥

प्रातर्नमामि पुरुषोत्तममीड्यपादम् ।
मोहाहिजन्यगरलस्य महौषधाढ्यम् ॥

साक्षात्कृतान्तकरिपुं वरपूज्यपादम् ।
आचार्य्यवर्य्यमभयप्रदमप्रमत्तम् ॥३॥

इति शिवम्

## ॥ श्रीमज्जयेन्द्राष्टकम् ॥

॥ भुजङ्गप्रयातं वृत्तम् ॥

ललाटे त्रिपुण्डं गलेरुद्रमालं शरीरं विभूत्या सदा राजमानम् ।
जलार्थं कराभ्यां दधानंसुपात्रं यतिं शङ्करं श्रीजयेन्द्रं नमामि ॥१॥

सुशान्तं सुकान्तं सुरम्यं सुशोभं सुनेत्रंसुकण्ठं सुबाहुं सुपादम् ।
सुसिद्धं सुशुद्धं सुबद्धं प्रसिद्धं यतिं शङ्करं श्रीजयेन्द्रं नमामि ॥२॥

सदा सुप्रसन्नं सदा ब्रह्मनिष्ठं सदा ब्रह्मतत्त्वे विलग्नं मनस्कम् ।
सदा वेदविद्यासु दीप्तं प्रदीपं यतिं शङ्करं श्रीजयेन्द्रं नमामि ॥३॥

सुगीतासुधां वर्षयन्तं यतीशं सुवेदान्तमार्गे च चित्तंददानम् ।
सुदेशे सुरेशं सदा प्रीणयन्तं यतिं शङ्करं श्रीजयेन्द्रं नमामि ॥४॥

कुमार्गस्थितानां जनानां मनस्कं सुमार्गे सदा शिक्षया योजयन्तम्।
परब्रह्मनिष्ठं परेशं भजन्तं यतिं शङ्करं श्रीजयेन्द्रं नमामि ॥५॥

सुपुत्रे कलत्रे सुमित्रे जनानां ममायं प्रवृत्तिं सदा ज्ञानदीपम् ।
विधायान्धकारं सुदूरं नयन्तं यतिं शङ्करं श्रीजयेन्द्रं नमामि ॥६॥

अघानां विनाशं सुखानां निधानं सुवेदस्यमूर्तिं पुराणं यतीशम् ।
निजानन्दरूपं सदावै भजन्तं यतिं शङ्करं श्रीजयेन्द्रं नमामि ॥७॥

यदात्मस्वरूपं भुविज्ञानगम्यं वदन्तीति लोके सदा पण्डिताश्च।
तदेवात्मतत्त्वं सदा धारयन्तं यतिं शङ्करं श्रीजयेन्द्रं नमामि ॥८॥

स्तवंयो यतीनां गुरूणां प्रभाते पठेत्प्रोति पूर्वं सदा सुप्रसन्नः।
स आप्नोति पुत्रं धनादिंच लोके शरीर प्रयाणेच मोक्षं प्रयाति ॥९॥

सुरत्नं सुचन्द्रो यतीनां चकार
इदं स्तोत्ररूपं गुरूणां प्रसन्नः
सुहेमस्यभूमौ सदा निर्विकारः
शिवस्याशुतोषस्य पादेषु लग्नः ॥१०॥

**॥ इति साहित्यालङ्कार पं. मामनचन्द्र शर्मा शास्त्रिकृतम्**
**श्रीमज्जयेन्द्राष्टकंसम्पूर्णम् ॥**

## ॥ श्री स्वामीजीकी महिमा ॥

जय स्वामी शांत जयेन्द्रसिद्ध, दर्शन से सब दुख द्वंद टरे ।
भीतर बाहर से शुद्ध होय, माया प्रपंच से जीव तरे ॥ टेक ॥

हैं त्यागी ज्ञान सरूप अलख अद्वैत रूपको धारे हैं ।
संन्यासमूर्ति प्रत्यक्ष अहैं, बचनों से जग उद्धारे हैं ॥
ज्यों जलसे कमल बाहर रह कर, त्यों जगत में रहकर न्यारे हैं ।
पहचाना जिसने भीतर से, उसको ये प्राण से प्यारे हैं ॥
क्या अद्भुत ज्योति सरूप अहै लखते ही सत्संकल्प जरे ।
जय स्वामी शांत जयेन्द्रसिद्ध, दर्शन से सब दुख द्वंद टरे ॥ १ ॥

सिद्धों की कृपाबिन आजलगे, नहिं किसीका भी निस्तार हुआ ।
चहे कोटि यतन पचमरे कोई, उस घर में नहीं पैठार हुआ ॥
कुछ भी दाया होजा जिसपर, वह मालिक का दीदार हुआ ।
स्वामी जी द्रवैं भरपूर जहां, वह अधंकार से पार हुआ ॥
इनकी इच्छा से सेवक के हों, ऋद्धि सिद्धि भंडार भरे ।
जय स्वामी शांत जयेन्द्रसिद्ध, दर्शन से सब दुख द्वंद टरे ॥ २ ॥

ऐसे सरूप को पृथ्वी पर, बिचरने की बड़ी जरूरत है ।
स्वारथवश लाखों लख पड़ते, ये परमारथ की मूरत है ॥
ऐसे त्यागी की सेवा तज, तरने को न कोई सुरत है ।
जिनका उपदेश प्रमोद रूप, हो भक्त हृदय भरपूरत है ॥
ज्ञानीसरूप के संग रहै, तो कभी नहीं भवकूप परे ।
जय स्वामी शांत जयेन्द्रसिद्ध, दर्शन से सब दुख द्वंद टरे ॥ ३ ॥

सब मत का है सिद्धांत यही, सद्ज्ञान गुरू बिन ना होवै ।
बहु जन्मों का दृढ़ अंधकार, गुरुदेव एक पल में खोवै ॥

जब तक ये मूर्ति नहिं द्रष्टि परै, माया प्रपंच में जग सोवै ।
ऐसे मुझको जो अपना लें, तो आत्मा परब्रह्म जोवे ॥
हे अपार महिमा भगवान् की, चैतन्य किस भांति बयान करे ।
जय स्वामी शांत जयेन्द्रसिद्ध, दर्शन से सब दुख द्वंद टरे ॥ ४ ॥

( शार्दूलविक्रीडितम् )

## ।।श्री स्वामी जयेन्द्रपुरीजी महाराजकी स्तुतिः।।

यः शिष्यान् परिपाति यञ्च भजते, संसारभीरुर्जनो-
यस्माद्व्याप्तमिदं जगच्च सकलं, यस्मै नमस्कुर्महे ॥
यस्माद्बोधमवाप्य गच्छति जनो, यस्य प्रसादात्परम् ।
यस्मिँल्लीनमिदञ्च याति सकलं, मां पाहि दीनं गुरो ?॥१॥

यः सांख्ये कपिलः पतञ्जलिरलं, योगे विरक्तो शुकः ।
साक्षादद्वयदर्शने शिवतनुस्तर्केषु यो गौतमः ॥
शान्तिक्षान्तिदयादिरत्नसहितो, ज्ञानाम्बुधीरक्षता–
दज्ञानाद्भयकारणान्निजजनान् श्रीमज्जयेन्द्रो गुरुः ॥२॥

दृष्टाः किङ्कवयो महत्वकथने, ज्ञानप्रदातुर्गुरोः ।
सादृश्यैर्बहुभिश्च किं कथयितुं, शक्ताश्च त ल्यताम् ॥
नेतीति प्रतिपादयन्ति निगमा, नो प्राप्य पारञ्जते ।
सोऽयं श्रीगुरुरद्य निर्मलतरं, धत्ताम्प्रसादं मयि ॥३॥

यं पूज्यं शरणागतार्तिहनने, दक्षं सदानन्ददम् ।
शिष्याणां त्रिविधाघहं यतिवरं, चाश्रित्य जाड्यापहम् ॥
अद्वैतं सुखमश्नुते कृतिजनो, यत्पादपद्माश्रितः ।
भक्त्या श्रीडयजयेन्द्रपुर्यभिधया, ख्यातं नमामो गुरुम् ॥४॥

साक्षाच्छ्रीजगदीश्वरेण रचिता, जीवा भवं यान्ति ते ।
तस्माद्दुःखकृतोऽवतार्य विमले, नित्ये परस्मिन्विभौ ॥
सोऽयं योजयति प्रदाय विमलं, ज्ञानं जनाल्हादकम् ।
मन्येऽहं तत एव विश्वजनकात्तस्मिन् गुरुत्वङ्गुरौ ॥५॥

यः साक्षज्जगतां गुरोः प्रतिनिधिः; संदृश्यते भूतले ।
ह्यद्वैतामृतवर्षणेन परितो, मोहार्कतप्ताञ्जनान् ॥
सम्यक्तोषयति प्रपीयसततं, ज्ञानं भजन्ते परम् ।
वन्दे तं शिरसा गिरा च मनसा, श्रीमज्जयेन्द्रं गुरुम् ॥६॥

यो वै वाक्यपदप्रमाणकुशलैः, संसेव्यमानोमुदा ।
जीवानामनिशं प्रहन्ति कलुषं, रागादिपञ्चात्मकम् ॥
नित्यं ब्रह्मसुखं च बोधनपरा, मुद्रा शुभा धार्यते ।
सेव्योऽयं यतिराड्गुरुः परमया प्रीत्याऽर्थिभिः श्रेयसः ॥७॥

शुद्धे ब्रह्मणि रोपितं निजमनस्संत्यज्य माक्ष्यात्मकान् ।
देहाक्षादिसमस्तबाह्यविषयान्, साक्ष्यात्मना तिष्ठति ॥
ख्यातो यः क्षितिमण्डले त्वभिधया श्रीमज्जयेन्द्रात्मना ।
तं पूज्यं यतिपूगवन्दितपदं भक्त्या नमामो वयम् ॥८॥

श्रीमज्जयेन्द्रगुरुवर्यनुति–र्महेशानन्देन रुद्ररतिना यतिना प्रणीता ।
यः श्रद्धया पठति नित्यमिमां दधाति,धर्मार्थकामपररुद्रपदान् मनुष्यः॥९॥

( वसंततिलकावृत्तमिदम् )

**इदं गुर्वष्टकं स्वामिचरणारविन्दयोस्समर्पितम् ।**

## ॥ श्री मण्डलेश्वर महाराजजी की प्रशंसा ॥

ॐ साङ्गैःसम्पूर्णवेदैर्मुनिभिरभिहितैर्दर्शनैश्चान्यतन्त्रैः ।
सार्धं श्रीशारदाम्बा कमलभवसुता यस्य जिह्वाग्रभागे
मोदान्नृत्यङ्करोति प्रसभमविरतं सत्य लोकं विहाय ।
पायाच्छ्रीसद्यतीन्द्रः सकलनियमिनामग्रणीः श्रीजयेन्द्रः ॥ १ ॥

कैलासे हिमवेष्ठिते गिरिवरे श्रीचन्द्रचूडाश्रमे ।
यात्रां क्लिष्टतरां मुदाहि कृतवान् पद्भ्यां गिरेर्मूर्धनि ॥
वेदान्तैकविचारतत्त्वनिपुणो युक्तश्च सन्यासिभिः ।
सो नित्यं जयताद्धि मण्डलपतिर्न्यासी जनाल्हादकः ॥ २ ॥

# श्री स्वामी जयेन्द्रपुरीजी महाराज की षट्पदी स्तुतिः ॥

॥ मनहर छंद ॥

शंकर समान दिव्य तेज हुके पुंज ज्योलु,
ज्योलु शसि उडुगण मंडल में आयो है ।
ज्योलु बनराज की कठोर बानी कर्ण परी,
मृगादी शृगालन के मोतडर पायो है ।
कहे महादेव ज्योलु पवन की प्रचरतासे,
बारीदल नष्ट कृष्ण रूप न दीखायो है ।
त्योलु मुनीनाथ महाराज मण्डलेश्वरश्री,
जयेन्द्र पुरी को परकास सत्य छायो है ॥१॥

शीलव्रतधारी सुखकारी अतिप्रिय भारी,
गुन को उचारी नहीं अंत है लगारी जुं,
दिव्यगुण रूपदिव्य शांति क्षमा दिव्यज्ञान,
दिव्य नैन सैन दिव्यबने दुःखहारी जुं,
कहे महादेव मारी मोह क्रोध लोभ अरी,
दिव्य वै प्रतापहुंते अवगुण हारी जुं,
सोहै मुनीनाथ महाराज मण्डलेश्वरश्री,
जयेन्द्र पुरी जी अविनास अविकारी जुं, ॥२॥

धर्म प्रतिपालक दीनजन पीरटारी चेको,
लीयो हरनाम पूर्ण कामजुं स्वरूप है,
मुक्ती संग्राम के सुभट हे प्रबल और,
भक्ति विज्ञान वर वीरता अनूप है,
कहे महादेव समदर्शी महा दयावंत,
अमृत निधान नीके रिद्ध सिद्ध कूप है,
मुनि जननाथ महाराज मण्डलेश्वर श्री,
धर्म धीरवंत महासंतन के भूप है, ॥३॥

आनंद स्वरूप है आनन्द है अहरनीस,
आनन्द में मनतन आनंद बढ़ायो है,
आनंद ते ज्ञान गुणवान भये आनंद ते,
आनंद ते दिव्य वैराग्य योग भायो है,
कहे महादेव सदा आनंद ते ध्यान मग्न,
आनंद उरहर गौरी वसायो है,
मुनि जननाथ महाराज मण्डलेश्वरके,
नाम को प्रताप सब जगमें छवायो है' ॥४॥

कीधौ सतधर्मनकी सेतु अविचल भये ।
कीधौ सत्य पुन्य धर्म नेम उर धारी है,
कीधौ वीर रस सूक्ष्म वृत्ति के निवास करी,
कीधौ अविकारी सदा शील व्रत धारी है,
कहे महादेव कीधौ ध्यान मग्न महेश्वर,

कीर्तौ रविकिरन ज्युं तेज पुंज धारी है,
मुनि जननाथ महाराज मण्डलेश्वर श्री,
जयेन्द्रपुरीजी गुरु दिव्य वर धारी है, ॥५॥

काहू को सहायक श्री देव रविनाथ भयो।
काहू को कनैयो यदुनंदन कहायो है।
काहू को सहायक माधव श्री मुकुंद भयो।
काहू मन भैरव श्री हनुमंत भायो है।
कहे महादेव काहुमन देवी कालीका है।
काहु मन ब्रह्मा इन्द्ररूप समुझायो है।
काहु ईष्ट वरुणते काहु नर नारायण,
मेरा मन ईष्ट मण्डलेश्वर में धायो है ॥६॥

[ इति षट्पदी मदीये वदन सरोजे सदा वसतु ]

## पूज्यपाद् प्रातः स्मरणीय श्री स्वामीजी महाराजकी कीर्तिस्मरणम्।

### ( शिखरिणी छन्द में )

यतीनां श्रेयांसं भुवनवलयाभूषणरुचिं,
महादेवाकारंगतछलमलाभास्वरहृदम्।
सदा ब्रह्माकारेनिहितमतिमार्तौषिधहितं,
जयेन्द्रं वन्देऽहं दिनमणिमहाकीर्तिकगुरुम ॥१॥

तथाप्यात्मामुकस्तिमिरवृतमन्दानतिशठान्,
समुद्धर्तुंलोके व्यवहरति चाज्ञो जनइव
महाशान्तं धीरं कलिमलहरं मोहरहितं,
जयेन्द्रं वन्दे तं दिनमणिमहाकीर्तिकगुरुम् ॥२॥

अजस्त्रं सत्साध्वावलिविहतपुष्पाञ्जलिचयं,
पटुं शास्त्रज्ञानां मुनिकुलविधुं दीनदयिनम् ।
सदाध्येयं वन्द्यं सुबुधकुलभानुं शुभकरं,
जयेन्द्रं वन्देऽहं दिनमणिमहाकीर्तिकगुरुम् ॥३॥

मुमुक्षूणां वर्गैः सकलभयनाशाभिलषिणां,
सदाकीर्णं वन्द्यैर्नत करतलैः पूजितपदम् ।
इहैवा कैलाशं कृतनिखिलतीर्थाटनमुनिं,
जयेन्द्रं वन्देऽहं दिनमणिमहाकीर्तिकगुरुम् ॥४॥

यमुत्सृज्योद्गन्तुं क्षण मपि न मेच्छां प्रकुरुते,
तथा वाणी नित्यं निजपरमधामेति मनुते ।
सदा भिक्षुव्यूहाऽखिल वसुद कल्पद्रुमरुचिम्,
जयेन्द्रं वन्दे तं दिनमणिमहाकीर्तिकगुरुम् ॥५॥

नराकारो भूत्वा परहितपरोयः कलियुगे,
अवातीर्णः शंभुः कलिमलयुतान् शोकसहितान्
समुद्धर्तुं मुक्तेः सुखनिकटमार्गं वितनितुं,
जयेन्द्रं वन्दे तं दिनमणिमहाकीर्तिकगुरुम् ॥ ६ ॥

स्वयं त्यागी साधुः कनकपणलोष्टेषु समदृक्,
सदा ग्रामाद्बाह्ये भवनकुटिकादौ निवसति ।
तथाप्यर्थार्थिभ्यो वितरतियथेष्टं सपदियः,
जयेन्द्रं वन्दे तं दिनमणिमहाकीर्तिक गुरुम् ॥ ७ ॥

मनुष्योऽयं स्वामीत्यतिमलयुतामन्दमनुजाः,
विजानन्तीच्छायं परमगुणकेन्द्र भवहरम् ।
प्रकाशानन्दोऽहं भवितुमनविघ्नस्सुसुलभं,
जयेन्द्रं वन्दे तं दिनमणिमहाकीर्तिक गुरुम् ॥ ८ ॥

जयेन्द्राष्टकमेतत्तु यः पठेद् गुरुसन्निधौ,
प्रभाते वा प्रदोषे वा नद्यां वा शिवमन्दिरे ॥ ९ ॥
इष्टसिद्धिमवाप्नोति वाचां सिद्धिश्च जायते,
मृत्वाप्यचिरमार्गेण शिवलोकं स गच्छति ॥१०॥

॥ इति प्रकाशानन्दविरचितं जयेन्द्राष्टकं संपूर्णम् ॥ ॐ तत्सत् ॥

# समर्पणम् !

गङ्गे गङ्गे नितान्ततरविमल पथे वारि धारा सुधाम् ।
नारा नार सुगरि प्रपथ पद् गतेर्या विरासीर्विरासीः ॥
देवी देवीर्वदन्ति श्रवणमुपगतास्ते विमूढा विमूढा ।
मातर्मात स्वरित्थं भव विभवपदं प्रापिका प्रापिकासि ॥१॥
शंभो शंभो रतस्ते कलितकनिलये या कृपाली कृपाली ।
मारामारारि कल्पान्कलयतु सततं सा समाना समाना ॥
नाथा नाथानथोनः प्रभवति भवति तावकी नावकीना ।
दीना दीनानु कम्पिन्यलमिति वरये भावनीया वनीया ॥२॥

# प्रार्थना !

यही विनय गंगा मैयासे जब तक शशि अरू सूर ।
श्रीयुत् श्री मण्डलेश्वरजी, अटल रहें भरपूर ॥ ३ ॥
जय स्वामी शांत जयेन्द्रसिद्ध, दर्शनसे सब दुःख द्वंद टरे ।
भीतर बाहर से शुद्ध होय, माया प्रपंच से जीवतरे ॥४॥
ऐसे स्वरूपको पृथ्वीपर, विचरनेकी बड़ी जरूरत है ।
स्वारर्थ वश लाखों लख पडते, ये परमारथकी मूरत हैं ॥५॥
है अपार महिमा भगवनकी चैतन्य किस भांति बयान करे ।
जय स्वामी शांत जयेन्द्र सिद्ध, दर्शनसे सब दुःख द्वन्दटरे ॥६॥
(अखिल नक्षत्राधिपती श्री मण्डलेश्वर भगवान्की जय ३)

श्री स्वामिचरणारविन्दयोस्समर्पितम् ।
मण्डलीस्थित ब्र० धर्मदत्त शर्मा-काशी ।

# आरती श्री गंगाजी की।

आरति श्री गंगाजी की कीजे,
भर भर अंजलि अमृत पीजे। आरति०
ब्रह्म लोक से उतरी है धारा,
तारे सगर सुत साठ हजारा ॥ आरति० ॥१॥
सब देवन में तुम महारानी,
आगम निगम पुराण बखानी ॥ आरति० ॥२॥
सेवा कर भागीरथ लाये,
सब साधुन मिल मंगल गाये ॥ आरति० ॥३॥
कंचन थाल कपूर की बाती,
जग मग ज्योति जगे दिन राती ॥ आरति० ॥४॥
जो श्री गंगाजी की आरति गावे,
बसे वैकुण्ठ परम फल पावे ॥ आरति० ॥५॥

इति शिवम्.

॥ श्री गंगार्पणमस्तु ॥

**सूचना**—ॐ नमः शिवाय बैंक में यथाशक्ति ॐ नमः शिवाय मंत्र तथा राम मंत्र लिख या लिखवाकर भेजियेगा। १६० शाखाओं से मंत्र लिखरकर आता है–१०५ करोड मंत्रलेख शिवार्पण हो चुके हैं।

[ **नोट**—प्रणव सहित मंत्र द्विजाति को ही लिखना चाहिये ]

**ठि. ॐ नमः शिवाय बैंक-काशी.**

---

ॐ नमः शिवाय बैंकके महोत्सवमें प्रयागकी अर्द्धकुम्भी पर धर्मार्थ वितरण–

श्री नारायण प्रि. प्रेस अहमदाबादमें रणछोडभाई वा. पटेलने छाप दीया और ब्रह्मचारी चैतन्यानन्दजीने प्रकाशित कीया.